अङ्क-२४
जुलाई-दिसम्बर २०१४

**वेदविद्या**
ISSN-2230-8962

# अथर्ववेदे शिक्षादर्शनम् (गुरुशिष्यसन्दर्भे)

**प्रो. धर्मेन्द्रःशास्त्री**

सर्वप्रथमं विविच्यते यत् का नाम शिक्षा ? शिक्षाशब्दोऽयम् **'शिक्ष विद्योपादाने'** इत्यस्माद्धातोः अकार प्रत्यये[१] कृते सति ततश्च स्त्रीत्ववाच्ये टापि[२] प्रत्यये कृते सति शिक्षाशब्दोऽयं निष्पद्यते । सा सम्पूर्णा अपि क्रिया, अथवा सम्पूर्णोऽपि व्यापारो विद्याग्रहणं भवेत्, शिक्षणं वा भवेत् पठनपाठनयोः सहायको भवति स व्यापारः एव शिक्षापदेन व्यपदिश्यते ।

महर्षिदयानन्देन सत्यार्थप्रकाशस्य स्वमन्तव्यामन्तव्यप्रकाशे शिक्षापरिभाषा एवम्प्रकारेण प्रतिपादिताऽस्ति- यया विद्या सभ्यता धर्मात्मता जितेन्द्रियता इत्यादीनां सद्गुणानां संवर्धनं भवेत्, अथ च अविद्याऽस्मितारागद्वेषाभिनिवेशाख्यानि दुःखानि अपगतानि भवेयुः । सा एव शिक्षा भवितुमर्हति । प्राचीनकाले गुरुशिष्ययोर्मध्ये विद्यापठनपाठनप्राक्काले अस्य मन्त्रस्य उच्चारणम् उभावपि गुरुशिष्यौ कुरुतः स्म -

**सह नाववतु सह नौ भुनक्तु**
**सह वीर्यं करवावहै ।**
**तेजस्विनावधीतमस्तु ।**
**मा विद्विषावहै ॥**[३]

मन्त्रस्य नौ इति कथनेन उभयोरपि गुरुशिष्ययोर्ज्ञानं भवति । प्राचीनकालशिक्षायाः पञ्च उद्देश्यानि अत्र ध्वनितानि भवन्ति -

सह नाववतु इति कथनेन ब्रह्मचर्यस्य ज्ञानं प्रतीयते । यतो हि ब्रह्मचर्यस्य सम्यक् पालनेनैव शरीर-मन-आत्मा-बुद्ध्यादीनां सम्यग् विकासो भवितुमर्हति । 'सह नौ भुनक्तु' इत्यनेन आजीविकोपार्जनं द्वयोर्मिलित्वा करिष्यत इति ध्वन्यते । 'सह वीर्यं करवावहै' इत्युक्ते सति सर्वेऽपि राष्ट्रवासिनो वीर्यवन्तः, तेजस्विनो, यशस्विनो, वर्चस्विनो भवेयुरिति ज्ञायते । छात्राः निर्बलाः, हीनाः, निस्तेजस्विनो नैव भवेयुरिति कामयते ऋषिः । यशस्विनो वर्चस्विनो भवेयुरिति ज्ञायते । छात्राः निर्बलाः, हीनाः, निस्तेजस्विनो नैव भवेयुरिति कामयते ऋषिः । 'तेजस्वि नावधीतमस्तु' इत्यनेन ध्वन्यते ज्ञायते प्रतीयते

---

[१] गुरोश्च हलः, अष्टा. ३.३.१०३
[२] अजाद्यतष्टाप्, अ. ४.१.४
[३] तैत्तिरीयोपनिषद् २.१.१

यत् अध्ययनम्-अध्यापनं सम्मानजनकं स्यात्। स्वपूर्ववर्तिनाम् आचार्याणां ज्येष्ठानां श्रेष्ठानां कृतेऽपि आनुकूल्यं स्यात्। 'मा विद्विषावहै' परस्परं सौहार्दं स्यात्, द्वेषभावना न वा स्यात्। अयमेव वैदिकी-शिक्षायाः आदर्श आसीत्। साम्प्रतिके कालेऽपि शिक्षाविद्भिस्तथैव व्यवहर्तव्यम्।

अथर्ववेदस्य एकादशकाण्डस्य पञ्चमसूक्ते षड्विंशति मन्त्राः सन्ति। येषु मन्त्रेषु तात्कालिकी वैदिकीशिक्षायाः ज्ञानं भवति। तस्य मन्त्रे ऋषिणा उद्घोषितमस्ति -

**आचार्यऽउपनयमानो ब्रह्मचारिणं कृणुते - तं रात्रिस्तिस्त्र**[1] । मन्त्रेऽस्मिन् सर्वप्रथमम् आचार्य-शब्दस्य पाठो वर्तते। यास्काचार्येण आचार्यशब्दस्य व्युत्पत्तिः प्रतिपादिताऽस्ति आचार्यः कस्मात् ? आचारं सदाचारं गुणाचारं ग्राहयतीति आचिनोति अर्थानिति शास्त्रस्य अर्थान् शिष्येषु समन्तान्निवेशयति बुद्धिं चापि संवर्धयति वा।[2] आचार्यः आचारं स्वशिष्यान् शिक्षयति बुद्धेर्विकासः शिष्यान् अनुशासने प्रतिबध्नाति। इतीमानि त्रीणि कर्तव्यानि आचार्यस्य प्रतिपादितानि सन्ति। द्वितीयः शब्दोऽस्ति ब्रह्मचारिणम् ब्रह्मणि चरितुं शीलमस्यास्तीति ब्रह्मचारी।[3] अनेन ज्ञायते यत् अन्तेवासिनाम् विविधो विकासो भवेत् शारीरिकः, मानसिकः, आध्यात्मिकश्च।

तृतीयः शब्दोऽस्ति 'उपनयमानोः स्वगुरुकुले ब्रह्मचारिणं दीक्षितं करोतिस्म।' आचार्य करणमाचार्यक्रिया। माणवकमीदृशेन विधिनात्मसमीपं प्रापयति।[4]

चतुर्थः शब्दोऽस्ति कृणुते गर्भमन्तः आचार्यः अन्तेवासिनं गर्भमन्तः कृणुते । यथा माता स्वगर्भं धारयति दशमासं यावत् । यदा च शिशुः सर्वाङ्गपरिपूर्णो भवति तदा तस्य जन्म भवति । एवमेव आचार्यः स्वगुरुकुलरूपउदरे तम् अन्तेवासिनं तावत् पर्यन्तं धारयति यावत् पर्यन्तं तस्य परिपूर्णविकासो नैव भवति । तिस्त्रः रात्रयः उदरे बिभर्ति । ताः तिस्त्रः रात्रयः काः सन्ति ? यावत् पर्यन्तं तस्य अन्तेवासिनः बौद्धिकविकासः, मानसिकविकासः, शारीरिकविकासः, परिपूर्णो न भवति तावत् पर्यन्तं स आचार्यकुलं धारयति तं जातं; यदा स्नातको भवति तदैव तस्य द्वितीयं जन्म भवति । तदैव स द्विज भवितुमर्हति । द्विज इति पदेन ज्ञायते यत् तस्य द्विधा जन्म भवति, एकः मातृकुक्षितः अपरश्च आचार्यस्य उदरतः । उत्तरकालिकः जन्म एव श्रेष्ठ उच्यते तदैव द्विजत्वमाप्नोति । यदा पर्यन्तम् आचार्येण तस्योपनयनं न कृतं तदा पर्यन्तं स मानवः न आसीत् अपितु 'माणवक' आसीत्, अतएव काशिकाकृता माणवकमुपनयते इति पठितमस्ति । कः माणवकः भवति ? इति जिज्ञासायां कारिकैषा पठिता -

---

[1] अथर्व० ११.५.३

[2] निरुक्ते १.१.१.

[3] अष्टाध्यायी ३.२

[4] अष्टा. १.३.३९ काशिकावृत्तौ ।

**अपत्ये कुत्सिते मूढे मनौरौत्सर्गिकः स्मृतः । नकारस्य च मूर्द्धन्यस्तेन सिद्ध्यति माणवः ।**[1] कुत्सितः मूढपुत्रः माणव इति उच्यते ।

आचार्यगर्भवासात् यदा तस्य द्विधा जन्म भवति तदैव स मानव भवति । ऋग्वेदे तस्य कृते उपदिष्टम् अस्ति- **'मनुर्भव'**[2] किञ्च उपनयनसंस्कारसमये ब्रह्मचारिणं स्वशिष्यं गुरुकुलशिक्षासंस्थायां प्रवेशसमये आचार्य इमं मन्त्रं पठति स्म ।

**मम व्रते ते हृदयं दधामि । मम चित्तमनु चित्तं ते अस्तु ।**
**मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ॥**

द्रष्टुमभिसंयन्ति देवाः - देवाः समाजस्य देवविभूषिता जनाः तं स्नातकं द्रष्टुमायान्ति स्म । आचार्येण स्वशिष्यस्य निर्माणं केन प्रकारेण कृतम् ? इति द्रष्टुं विद्वान्सः समागच्छन्तिस्म। अनेन मन्त्रेण तात्कालिकी वैदिकी शिक्षा कीदृशी आसीत् ? तस्याः किं स्वरूपम् आसीत् ? उद्देश्यं किम् आसीत् ? इत्येतत् सर्वं विवेचितं भवति । स द्विजो भूत्वाऽपि आचार्यः पुनरपि तं प्रति आदेशयति स्म - **'यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि ।'**

अद्यत्वे या शिक्षापद्धतिः प्रचलिता दृश्यते । तस्यां गुरुशिष्ययोः सम्बन्धः कीदृशः वर्तते ? इत्येतत् सर्वैर्ज्ञायत एव ।

वैदिकशिक्षायाम् अन्तेवासी महत्त्वपूर्णं स्थानं लभते स्म । अग्नौ तिस्रः समिधः जुहोति स्म । का च ताः तिस्रः समिधः ? इति जिज्ञासायां मन्त्रेऽस्मिन् स्फुटं प्रतिपादितमस्ति -

**इयं समित् पृथिविद्यौर्द्वितीयोतान्तरिक्षं समिधा पृणाति । ब्रह्मचारी समिधा मेखलया श्रमेण लोकांस्तपसा पिपर्ति।**[3]

स ब्रह्मचारी श्रमेण सर्वान् लोकान् पूरयितुमिच्छति । पृथिवीस्थं यत् सर्वं ज्ञानम्, अन्तरिक्षस्थज्ञानं, द्युलोकस्य यज्ज्ञानं तत् सर्वमवाप्नोति ।

गुरुशिष्ययोर्मध्ये श्रवण-मनन-निदिध्यासनेनोपगतया विद्यया संसारस्य पृथिवीसूर्यादीनां समस्तानां पदार्थानां तत्त्वज्ञानं कृत्वा तस्योपयोगः सम्यक्तया स चिकीर्षति । अतएव ब्रह्मचर्यसूक्ते पठितमस्ति -

**आचार्यस्ततक्ष नभसी उभे इमे ते रक्षति तपसा ब्रह्मचारी तस्मिन्देवाः सम्मनसो भवन्ति।**[4]

आचार्यकुलं नैव तच्छक्नोति यत्र केवलं शिक्षायाः उद्देश्यं रुप्यकाणाम् अर्जनमेव स्यात् । प्राचीनकाले केवलं छात्राणां चरित्रनिर्माणं कथं भवेत् ? इत्येव सर्वे आचार्याः कामयन्ते स्म । आचार्याः

[1] अष्टा. ४.१.१६१ काशिकावृत्तौ ।
[2] ऋग्वेदः १०.५३.६
[3] अथर्ववेदः ११.५.४
[4] अथर्व० ११.५.८

कीदृशा भवेयुः ? इति विषये महर्षिणा दयानन्देन उल्लिखितमस्ति - ये मनुष्या इह निन्दास्तुतिहानिलाभादीन् तितिक्षवः पुरुषार्थिनः सर्वैः सह मैत्रीमाचरन्त आप्ताः स्युस्ते सर्वैः सेवनीयाः सत्कर्तव्याश्च त एव सर्वेषामध्यापका उपदेष्टारश्च स्युः।[१] छात्रान् प्रति महर्षिवर्य्या लिखन्ति - हे धीमन्तो विद्यार्थिनः ! ये युष्मभ्यं विद्यां प्रयच्छेयुस्तान्निष्कपटत्वेन प्रीत्या सेवध्वम् । जितेन्द्रिया भूत्वा यथार्थ-विद्यां प्राप्नुत ।[२] छात्रा अपि सहनशीलाश्चन्द्रवत् शान्तचित्ताः भवेयुः - ये विद्यामिच्छेयुस्ते सर्वेषां मर्मच्छिदो वाचः सहन्ताम् । चन्द्रवच्छात्रा भूत्वा विद्याविनयौ गृह्णन्तु । शिष्याः अन्तेवासिनः प्रार्थ्यन्ते स्वगुरवः- हे आचार्यप्रवर ! वाचस्पते ! भूयोभूयः आगत्य देवेन मनसा अस्मान् तत्रभवन्तः पाठयन्तु । निरमयपाठनसमये अस्माकं छात्राणां मनांसि तत्रैव मोमुद्येरन् । यदधीतं मय्येवास्तु तत् श्रुतं भवेत्। अतएव प्रार्थ्यते -

**पुनरेहि वाचस्पते देवेन मनसा सह ।**
**वसोष्पते नि रमय मय्येवास्तु मयि श्रुतम् ॥**[३]

यज्ज्ञानम् अधिगम्यते अस्माभिः तद्वत् व्यवह्रियते अस्माभिः । **सं श्रुतेन गमेमहि मा श्रुतेन वि राधिषि**[४] एवम्प्रकारेण निष्कर्षरूपेण वक्तुं शक्यते यत् वैदिकीपरम्परायां शिक्षाकाले आचार्यस्य महत्त्वपूर्णं स्थानं जायते स्म। अन्तेवासिनामपि महत्त्वपूर्णं स्थानमासीत् इत्यत्र नास्ति काऽपि संशीतिः। उभयोर्मध्ये योजकरूपेण विद्या आसीत्। ततश्च प्रवचनं, व्याख्यानम् आसीत् अतएव उपनिषदि शिक्षामाहात्म्यं प्रतिपादितम् आचार्यः पूर्वरूपम् अन्तेवासी उत्तररूपम् विद्या सन्धिः, प्रवचनं-सन्धानं मन्त्रमिदं महत्त्वपूर्णं स्थानं भजते शिक्षाप्रसङ्गे । वैदिकशिक्षापद्धत्याः इमानि उद्देश्यानि आसन् बुद्धेर्विकासः, सुबुद्धिं विना शिक्षा नैवाधिगन्तुं शक्यते।[५] शिक्षामाध्यमेन अज्ञानं तिरोहितं भवति[६] । ज्ञानप्रदानं जीवने यत् कौशलं तस्याविष्करणं स्यात्।[७] चिन्तनक्षमतायां वृद्धिः स्याद् दैवीगुणानां विकासो विकासो भवेत् । आसुरीप्रवृत्तीनां निरोधो भवेत्।[८] न केवलं वैयक्तिकविकास एव भवेत् अपितु विश्वजनीना शिक्षा भवेत्।[९]

---

[१] यजुर्वेदः ३४.१८ इति मन्त्रस्य भावार्थः ।
[२] ऋग्वेदः ४.३४.३ इति मन्त्रस्य भावार्थः ।
[३] अथर्व. १.१.२ ।
[४] अथर्व. १.१.४ ।
[५] अथर्ववेदः ७.१६.१
[६] ऋग्वेदः १०.१८२.३
[७] ऋग्वेदः १०.१८२.३
[८] ऋग्वेदः १०.१८२.३
[९] यजुर्वेदः १७.७४

शुद्धाचरणं सुचरित्रनिर्माणं स्यात् बालकानां[1] यजुर्वेदे शिक्षोद्देश्यं प्रतिपादितम् - **सा विद्या या विमुक्तये**[2] । ज्ञानकर्मणोः समन्वयः जीवने स्यात् ।[3] श्रेयप्रेयश्च उभयोः समन्वयकरणीयः ।[4] अध्यात्मभौतिकवादयोः समन्वयः आवश्यकः । अनुशासनं समर्पणभावना च इत्यनयोः विकासः जीवने अत्यावश्यक अस्ति ।[5] इमानि उद्देश्यानि सार्वकालिकानि सार्वदेशिकानि च सन्ति । मानवीयजीवने मूल्यानां विकासः एव शिक्षायाः उद्देश्यं भवितुमर्हति । आधुनिका ये शिक्षाशास्त्रिणः सन्ति तैः सर्वैः सम्मिल्य एतद्विषयकं चिन्तनम् अवश्यं करणीयम् । येन च प्राचीनाधुनिकशिक्षयोर्मध्ये समन्वयो भवितुं स्यात्। तदैवास्य राष्ट्रस्य कल्याणं भवितुं शक्यम् इत्यत्र नाऽस्ति सन्देहावसरः ।

**प्रो. धर्मेन्द्रःशास्त्री**
सचिव
दिल्ली संस्कृत अकादमी (दिल्ली सरकार)

[1] यजुर्वेदः १.६
[2] यजुर्वेदः ४०.१४
[3] यजुर्वेदः ४०.१४
[4] यजुर्वेदः ४०.१४
[5] अथर्ववेदः १९.४१.१